
# पञ्चदशः पाठः  मानवताधर्मः । (सरलार्थलेखनार्थम्)

कलियुगेऽस्मिन् सर्वत्र विविधधर्माणां प्रचारः भवति इति दृश्यते। किन्तु, 'धर्मः' इति सङ्कल्पनायाः कः अर्थः इति चेत् यः धारयति सः धर्मः। स्वकर्तव्यस्य पालनं नाम धर्मः । यथा - राजधर्मः, पितृधर्मः, कन्याधर्मः, पतिधर्मः, पत्नीधर्मः इत्यादयः ।

यदि मानवः सर्वत्र शान्तिम् इच्छति, विवादं युद्धं च त्यक्तुम् इच्छति तर्हि तेन मानवताधर्म एव पालनीयः । सर्वे धर्माः मानवताहितवादिनः एव । अतः मानवता सर्वधर्माणां मूलम् । स मानवताधर्म एव अत्र वर्णितः अस्ति **म. म. डॉ. देवीप्रसाद खरवण्डीकरमहाभागैः** ।

- मानवता नाम किम् ?
- मानवताधर्मम् अनुसृत्य सामाजिककार्यं कुर्वतां जनानां नामानि कथयत ।



यथैव सकला नद्यः प्रविशन्ति महोदधिम्।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।१।।

षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।२।।

एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम् ।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।३।।

सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ।।४।।

यथा प्रकाशयत्येको भानुर्भुवनमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ।।५।।

आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ।।६।।

सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ।।७।।

## भाषाभ्यासः 

### १. पूर्णवाक्येन उत्तरं लिखत।

अ) सकला नद्यः कं प्रविशन्ति ?

आ) सङ्गीते स्वराः कीदृशाः ?

इ) कः सर्वधर्मान् व्याप्नोति ?

ई) भानुः कं प्रकाशयति ?

उ) कां भज इति कविः वदति ?

### २. सन्धिविग्रहं कुरुत ।

अ) भानुर्भुवनमण्डलम् = ______ + भुवनमण्डलम् ।

आ) प्रकाशयत्येकस्तथा = ______ + ______ + तथा ।

इ) व्यवहरेल्लोके = ______ + लोके ।

ई) एषोऽभ्युदयकृत् = एषः + ______ ।

### ३. पाठात् ल्यबन्त-अव्ययानि चित्वा लिखत

### ४. सूचनानुसारं कृतीः कुरुत

अ) सर्वधर्मान् परित्यज्य ध्रुवं मानवतां भज । (पूर्वकालवाचकं निष्कासयत।)

आ) नद्यः महोदधिं प्रविशन्ति । (कर्तृपदम् एकवचने परिवर्तयत ।)

इ) त्वं सर्वधर्मान् परित्यज्य मानवतां भज । ('त्वं' स्थाने 'भवान्' योजयत ।)

ई) सर्वे धर्माः मानवतागुणं शंसन्ति । (कर्मवाच्ये परिवर्तयत ।)

उ) भानुः भुवनमण्डलं प्रकाशयति । (णिजन्तं निष्कासयत ।)

### ५. समानार्थकशब्दमेलनं कुरुत

| | | | | |
|---|---|---|---|---|
| (१) सरि | (२) रङ्गः | (३) अ | (४) दिनकृत् | (५) मार्गः |
| (अ) वण | (आ) भानुः | (इ) नदी | (ई) पन्थाः | (उ) सलि |

### ६. माध्यमभाषया उत्तरं लिखत।

अ) मानवताधर्मः अभ्युदयकृत् कथं वर्तते ?

आ) कदा मानवता भवेत् ?

इ) सर्वे धर्माः मानवताधर्मं समाश्रिताः इति सोदाहरणं स्पष्टीकुरुत।

### ७. विशेष्यैः रिक्तस्थानानि पूरयत ।

सर्वे → ______

श्रेयस्करः → ______

सकलाः → ______

षड्जमूलाः → ______

### ८. क्रियापदतालिकां पूरयत

| ए.व. | द्विव. | ब.व. | पुरुषः | लकारः |
|---|---|---|---|---|
| नर्तिष्यति | ______ | ______ | प्रथमः | लृट् |
| ______ | दिशेथे | ______ | मध्यमः | लट् |
| ______ | ______ | अमिलाम | उत्तमः | लङ् |

### ९. नामतालिकां पूरयत

| ए.व. | द्विव. | ब.व. | विभक्तिः |
|---|---|---|---|
| ______ | ऋत्विग्भ्याम् | ______ | तृतीया |
| ______ | ______ | स्रग्भ्यः | चतुर्थी |
| दिशि | ______ | ______ | सप्तमी |

| ए.व. | द्विव. | ब.व. | विभक्तिः |
|---|---|---|---|
| ______ | ______ | योगिषु | सप्तमी |
| ______ | श्रेष्ठिनौ | ______ | प्रथमा |
| धाम्ना | ______ | ______ | तृतीया |

# अभ्यासपत्रम् ४

(१३, १४, १५ पाठानाम् आधारेण)

**१. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

अ) अष्टाध्यायी इति नाट्यशास्त्रविषयक: ग्रन्थ: अस्ति ।

आ) संस्कृतस्य ज्ञानम् आधुनिकभारतीयभाषाणां विश्लेषणे अतीव साहाय्यकरं भवति ।

**२. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

अ) ________ समीपे सुभाषितसङ्ग्रहं दृष्ट्वा मया चिन्तितम् । (भवत्यै/भवत्या:)

आ) ________ अवगतम् । (मया/अहम्)

इ) पृष्ठत: ________ युवका: गोष्ठिषु रता: । (कश्चन/केचन)

ई) अस्माभि: संस्कृतस्य अध्ययनं ________ कृतम् । (शालां/शालायां)

उ) एते सर्वेऽपि ________ सहभागिन: । (परिषदि/कार्यशालायां)

**३. विरुद्धार्थकशब्दान् लिखत ।**

बलवान्, पुरत:, निर्धन:, मित्रम्, पण्डित:, श्रेयस्कर: ।

**४. समासविग्रहं कुरुत ।**

दारपोषणरता:, यमराजसहोदर:, रामाभिषेक:, पशुपति:, पन्नगभूषण:, समुद्रसुता, प्रतीक्षालय:,निद्रामग्न:, समीपस्थ:, सुभाषितसङ्ग्रह:, महाकाव्यम्, महाविद्यालय:, भरतमुनि:, विशेषार्हता, मानवताधर्म:, सर्वधर्मा:, अभ्युदयकृत्, अम्भोदा:, सावधानमन: ।

**५. नामतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ________ | भूमिभ्याम् | ________ | पञ्चमी |
| विद्युति | ________ | ________ | सप्तमी |
| ________ | ________ | अम्बूनि | प्रथमा |

**६. सर्वनामतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| एतेन | ________ | ________ | तृतीया |
| ________ | ________ | युष्मान्/व: | द्वितीया |
| ________ | ________ | काभ्य: | चतुर्थी |

**७. क्रियापदतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| ________ | यच्छत: | ________ | प्रथम: | लट् |
| ________ | स्तम् | ________ | मध्यम: | लोट् |
| विन्देयम् | ________ | ________ | उत्तम: | विधिलिङ् |

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| सहते | ________ | ________ | प्रथम: | लट् |
| ________ | लिखेतम् | ________ | मध्यम: | विधिलिङ् |
| आसीत् | ________ | ________ | प्रथम: | लङ् |

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| ________ | ________ | पूजयाम | उत्तम: | लोट् |
| ________ | अकुर्वाथाम् | ________ | मध्यम: | लङ् |
| ________ | ________ | गमिष्याम: | उत्तम: | लृट् |

८. **धातुसाधित-विशेषण-तालिकां पूरयत ।**

| धातु: | क्त | क्तवतु | कृत्या: | शतृ/शानच् |
|---|---|---|---|---|
| पूज् (१० उ.प.) | ________ | ________ | पूज्य: | पूजयमान: |
| खाद् (१ प.प.) | खादित: | खादितवान् | ________ | ________ |
| लभ् (१ आ.प.) | ________ | लब्धवान् | लभनीय: | ________ |

## अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत ।

यथा - **त्वं तु प्रजाहितदक्ष: नृप: ।**

**त्वं तु प्रजाहितदक्ष: राजा/राट्/पार्थिव:/क्ष्माभृत्/भूप:/महीक्षित् ।**

१. स: मनुष्य: अपृच्छत् ।

२. जम्बूक: मनसि आनन्दित: ।

३. एष: कल्याणकारी नृप: ।

४. मृग: तं दृष्ट्वा अब्रवीत् ।

५. स: नर: शत्रुनन्दन: ।

६. स: वञ्चक: क्वास्ते ?

७. गौ: अपि मञ्चं समागता ।

८. शङ्करस्य पिता शिवगुरु: ।

९. एतद् विश्वं परमाणुभ्य: निर्मितम् ।

१०. काकशब्दं श्रुत्वा शृगाल: सत्वरं पलायित: ।

११. 'तथास्तु' इति अब्रवीत् भगवान् सुगत: ।

१२. यस्मात् ज्ञानं लभते स: गुरु: एव ।

१३. एष: सुगत: एव ननु भगवान् बुद्ध: ।

१४. शृगाल: स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत् ।

१५. अर्णवस्य पिता विज्ञानस्य प्राध्यापक: ।

१६. मम पुत्र: राघु: अपि पञ्जरसमीपमागत्य पृष्टवान् ।

१७. एका महिला स्वपुत्रेण सह व्याघ्रं द्रष्टुम् आगता ।

१८. माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म ।

१९. चेतसा अनिच्छन्ती अपि विवशा माता अवदत् ।

२०. मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरत: ।

२१. हे राजेन्द्र! तव पिता दु:शासक: वेनराज: ।